Duration : 3 hours                                                     Marks : 100

**N. B.** All questions are compulsory.
All questions carry equal marks**.**
Figures to the right indicate marks to a sub question.

**Q.1. सटीपम्** अनुवदत| (केवलं **द्वे**) (10)

A. बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते|
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्||
कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः|
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्|| (२. ५०, ५१)

B. यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन| (10)
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते||
नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः|
शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः|| (३. ७,८)

C. किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा| (10)
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ||
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु|
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः|| (९. ३३, ३४)

Q.2. केवलं **द्वौ** परिच्छेदौ लिखत|

A. भगवद्गीतायाः पार्श्वभूमिः। (10)

B. क्षात्रधर्मः | (10)

C. विश्वरूपदर्शनम् | (10)

Q.3. केवलं **द्वौ** उत्तरत|

A. ससन्दर्भं स्पष्टीकुरुत| (10)

i) क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति|

ii) रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते|

B. ससन्दर्भं स्पष्टीकुरुत| (10)

i) प्रमादमोहौ तमसो भवतोऽज्ञानमेव च|

ii) छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्|



7070D8E3A90CB751FF4E99E2C5FCBB89

C. 'दैवासुरसंपद्' इति विषयम् अधिकृत्य टिप्पणीं लिखत| (10)

Q.4. केवलं **द्वौ** उत्तरत|

A. श्लोकपूर्तिं कुरुत| (10)

i) द्वाविमौ पुरुषौ लोके --------- एव च |
------ सर्वाणि भूतानि कूटस्थः -------- उच्यते||

ii) यस्मात्क्षरमतीतोऽहमक्षरादपि -------- |
अतोऽस्मि ------ वेदे च प्रथितः ------ ||

B. **संस्कृतम्** आश्रित्य उत्तरत| (10)

i) भगवद्गीता कस्मिन् पर्वणि वर्तते?

ii) हतः किं प्राप्नोति?

iii) युद्धं जित्वा पार्थः किं भोक्ष्यते?

iv) आत्मानं कः न दहति?

v) भगवद्गीतायाः नवम-अध्यायस्य नामधेयं किम्?

C. समानार्थकशब्दान् लिखत| (10)

i) वसनम्।

ii) शरीरी|

iii) पार्थः।

iv) पावकः।

v) युद्धम्|

Q.5. टिप्पणीं लिखत| (केवलं **द्वे**)

A. आत्मस्वरूपवर्णनम्। (10)

B. गुह्यतमं शास्त्रम्। (10)

C. राजविद्या| (10)

-----------------------------



7070D8E3A90CB751FF4E99E2C5FCBB89